પ્રાર્થનાધશકસ્તોત્રમ

રમારમણમધ્વાદિદેશિક શ્રીહૃદબ્જગ ।
હયગ્રીવ કૃપાલો મે પ્રાર્થનાં શ્રુણુ સાદરમ ॥ ૧ ॥

અયોગ્યવિષયે સ્વામિન સર્વથા ન મનો ભવેત ।
ચાંચલ્યં મૂલતશ્છિંધિ દુરાશાં હર દૂરતઃ ॥ ૨ ॥

દુર્બુદ્ધિં ચ ન મે દેહિ દુઃશાસ્ત્રાવર્તને રતિમ ।
હાપયસ્વ ચ દુર્માનં દુર્ગુણં મોચય પ્રભો ॥ ૩ ॥

દુઃસંગં દુષ્ક્રિયાં છિંધિ હર લોકાટનાત્પદૌ ।
ન નિયોજય ચક્ષૂંષિ પરદારાદિદર્શને ॥ ૪ ॥

દુષ્પ્રતિગ્રહદુસ્પર્શે કરૌ મા ચોદય ધ્રુવમ ।
અગમ્યાગમને ગુહ્યાં ઘ્રાણમાઘ્રાણનેઽસતામ ॥ ૫ ॥

અપકર્ષતુ જિહ્વાં મે લોકવાર્તાદુરન્નતઃ ।
દુર્વાર્તાદુષ્ટશબ્દેભ્યો નિવર્તય હરે શ્રુતી ॥ ૬ ॥

ભવદિચ્છાનુગં ચેતો યોગ્યસદ્વિષયં ભવેત ।
યદૃચ્છાલાભસંતૃપ્તં નિશ્ચાંચલ્યં ભવેત્વયિ ॥ ૭ ॥

સજ્ઞાનં સર્વદા દેહિ સચ્છાસ્ત્રાવર્તને રતિમ ।
સત્સંગં સત્ક્રિયાં ચૈવ પાદૌ ત્વત્ક્ષેત્રસર્પણે ॥ ૮ ॥

શ્રીમધ્વશાસ્ત્રશ્રવણે નિયંક્ષ્વ શ્રવણે સદા ।
હયાસ્ય ચક્ષુષી ચેમે દર્શને સન્નિયોજય ॥ ૯ ॥

કરૌ ત્વદર્ચને નિત્યં સુખતીર્થસ્ય લેખને ।
ત્વદાલાપે ત્વદુચ્છિષ્ટભોજને કુરુ જિહ્વિકામ ॥ ૧૦ ॥

ઘ્રાણં ભવતુ નિર્માલ્યાઘ્રાણને નમને શિરઃ ।
દેહિ મે તુ જ્જ્ઞાનભક્તિપશુપુત્રધનાદિકમ ॥ ૧૧ ॥

પ્રાર્થનાદશનં ચૈતત ત્રિકાલે યઃ પઠેન્નરઃ ।
તસ્યાભીષ્ટં હયાસ્યોઽસૌ દત્વા રક્ષતિ સર્વદા ॥ ૧૨ ॥

॥ ઈતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં પ્રાર્થનાદશકસ્તોત્રં સમાપ્તમ ॥